# अभ्यासप्रश्नपत्रम्-3

# Practice paper3

**कक्षा – द्वादशी (XII)**

**संस्कृतम् (केन्द्रिकम्) कोड-322**

**समयः – होरात्रयम्   सम्पूर्णाङ्का: -80**

**सामान्यनिर्देशाः –**

*कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 19 प्रमुखाः प्रश्नाः सन्ति।
*अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति । अस्मिन् कालावधौ केवलं प्रश्नपत्रं पठनीयम्,उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

**प्रश्नपत्रस्वरूपम्**

**अ-भागः बहुविकल्पात्मकः - 40 अङ्काः**

**आ-भागः वर्णनात्मकः - 40 अङ्काः**

(I)अस्मिन् प्रश्नपत्रे द्वौ भागौ स्तः।

(ii) अ-भागः बहुविकल्पात्मकः अस्ति।

(iii) आ- भागः वर्णनात्मकः अस्ति।

(iv) उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्क: अवश्यं लेखनीयः

(v) प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(vi) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

(vii) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीया:।

## (अ – भागः)

**बहुविकल्पात्मकाः प्रश्ना:** **अङ्का:-40**

### अनुप्रयुक्तव्याकरणम्

**1.अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं सन्धिपदं सन्धिच्छेदपदं वा प्रदत्तविकल्पेभ्यः चिनुत –(केवलं प्रश्नषट्कम्) 1×6=6**

1.<u>**शरीरेऽरि**</u>: प्रहरति हृदये स्वजनस्तथा
(क)शरीरे +अरि:

(ख.) शरीरे+ रि:
(ग.) शरीर+ अरि
2.वैवस्वतो **मनुर्नाम** मनीषिणां माननीयः।
(क)मनुर् + नाम
(ख.) मनुः + रनाम
(ग.) मनु: + नाम
3.दौवारिक: **गम्भीरस्वरेणैवम्** अवादीत्।
(क) गम्भीर+स्वरेणैवम्
(ख) गम्भीरस्वरेण+एवम्
(ग) गम्भीरस्वर + एवम्
4.रूपं प्रसिद्धं न **बुधास्तदाहु**
(क)बुधा:+तत्+आहु:
(ख) बुधास्त+दाहु:
(ग) बुध:+तदाहुः
5.**निबन्धायासुरी** सम्पद् मता।
(क)निबन्धाय+आसुरी
(ख) निबन्धाया+असुरी
(ग) निबन्ध+ आसुरी
6.**अच्छन्दांस्यगीतानि** यजूंषि
(क)अच्छन्दांसि+गीतानि
(ख) अछन्दांसि+अगीतानि
(ग)अच्छन्दांसि+अगीतानि
7. **लक्ष्मीस्तु** तव दासी भविष्यति।

(क)लक्ष्मीस्+तु

(ख) लक्ष्मी:+तु

(ग) लक्ष्म+ईस्तु

**2. अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं समस्तपदं विग्रहवाक्यं वा प्रदत्तविकल्पेभ्यः चिनुत - (केवलं प्रश्नपञ्चकम्) 1×5=5**

i. अहं लोकं **युवतिरहितं** कर्तुम् वाञ्छामि।
(क) युवतिभिःरहितम्
(ख) युवतिभ्य: रहितम्
(ग) युवतिं रहितम्
ii. यानि **अनवद्यानि** कर्माणि तानि सेवितव्यानि ।
(क) न वद्यानि
(ख) अन् अवद्यानि
(ग) न अवद्यानि
iii. तस्य गुणाः **गुणानुबन्धित्वात्** सप्रसवा: इव।
(क) गुणानाम् अनुबंधित्वात्
(ख) गुणेषु अनुबंधित्वात्
(ग) गुणै: अनुबंधित्वात्
iv. स: **साक्षेपम्** अवोचत्।
(क) आक्षेपेण समम्
(ख) आक्षेपेण तुल्यम्

(ग) आक्षेपेण सहितम्
v. आत्मनः **वधस्य योजनां** ज्ञात्वा भोजः कथितवान्।
(क) वधस्ययोजनाम्
(ख) वधयोजनाम्.
(ग) वधययोजनाम्
vi. अपि एका **प्रयोगशाला** वर्तते।
(क) प्रयोगस्य शाला
(ख) प्रयोगेण शाला
(ग) प्रयोगाय शाला
vii. स एव **उचितम् अनतिक्रम्य** व्यवहरिष्यति।
(क) यथोचितम्
(ख) सोचितम्
(ग) यदोचितम्

**3. रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृतिं प्रत्ययं प्रदत्तविकल्पेभ्यः चिनुत – (केवलं प्रश्नषट्कम्) 1×6 =**

(i) वैवस्वत: मनुर्नाम मनीषिणां ............(**मान् + अनीयर्**) आसीत्।
(क) माननीयः
(ख) माननीयर्
(ग) मननीयः
(ii) समीपमागत्य संन्यासिना **उक्तम्।**
(क) वच् + क्त
(ख) उच्+क्त
(ग) वक्+क्त
(iii) पण्डित्येन सम्भृता........... (**मन् + क्तिन्**) यस्य, सः तु मितभाषी एव भवति।
(क) मन्क्ति
(ख) मन्ति
(ग) मति:
(iv) **रूपवताम्** अपेक्षया विद्या: मानं लभन्ते।
(क) रूप+वतुप्
(ख) रूप+मतुप्
(ग) रूप+मताम्
(v) ...............(**अन् + इष् + शतृ**) अपि वत्सराज: भोज रात्रौ वनं नीतवान्।
(क) अनिच्छन्
(ख) अनिषत्
(ग) अनिषतृ
(vi) तत्र अपौरुषेयं शास्त्रमेव.............. (**श्रु + क्तिन्)**।
(क) श्रुतिन्
(ख) श्रुति:
(ग) श्रुक्तिः
(vii) अहम् ईश्वर:, अहम् ...........(**भोग +इनि**)।
(क) भोगिनि
(ख) भोगन्
(ग) भोगी

**4. समुचितम् उपपदविभक्तिरूपं चिनुत- (केवलं प्रश्नत्रयम्) 1×3=3**

i. धिक्!................. अविज्ञाय उपालभसे। (अस्मद्)
(क )अस्मदं
(ख )अस्मान्

(ग) अहम्
ii. दिलीपस्य ……………..सदृश: आगमः आसीत्। (प्रज्ञा)
(क) प्रज्ञया
(ख) प्रज्ञाम्
(ग) प्रज्ञाया:
iii. ……………..न प्रमदितव्यम्। (धर्म)
(क) धर्मम्
(ख) धर्मेण
(ग) धर्मात्
iv. राजा राज्यं……………. दत्त्वा तदुत्सङ्गे भोज मुमोच। (मुञ्ज)
(क) मुञ्जम्

(ख) मुञ्जाय

(ग) मुञ्जस्य

# पठितावबोधनम्

5. भाषिककार्यम् - निर्देशानुसारम् उत्तराणि चिनुत - (केवलं प्रश्नषट्कम्) 1×6=6

i. "**वत्सराजः अनिच्छन् अपि भोजं वनं नीतवान्** " अत्र '**इच्छन्**' इतिपदस्य विपर्ययपदं किम् ?

(क) भोजम्

(ख) अनिच्छन्

( ग) (नीतवान्)

ii. "**पुत्रवधः न कदापि हिताय भवति**" अत्र '**भवति**' इति क्रियाया: कर्तृपदं किम् ?

(क) पुत्रवधः

(ख) हिताय

(ग) कदापि

iii. "**सन्यासिनः अपि कठोरै: भाषणै: तिरस्करोषि**" अत्र **विशेष्यपदं** किम् ?

(क) संन्यासिनः

(ख) भाषणै:

(ग). कठोरै:

iv. "**प्रजानां भूत्यर्थं स ताभ्यो बलिमग्रहीत्**" अत्र '**कल्याणार्थम्**' इत्यर्थे किं पदं प्रयुक्तम् ?

(क) भूत्यर्थं

(ख) प्रजानाम्

(ग) बलिम्

v. "**स परिखीकृतसागरां ऊर्वीं शशास**" अत्र '**स**' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(क) दशरथाय

(ख) दिलीपाय

(ग) मुञ्जाय

vi. “**अहं ब्रह्मविद्यां सरसाम्**” अत्र **विशेषणपदं** किम् ?

(क) अहम्

(ख)ब्रह्मविद्याम्

(ग) सरसाम्

vii. “**इदमद्य लब्धम् इमं प्राप्स्ये मनोरथम्**” अत्र ‘**अभिलाषाम्**’ इतिपदस्य पर्यायपदं किम् ?

(क) लब्धम्

(ख) मनोरथम

(ग) इदम्

**6. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् उत्तरं चिनुत -(केवलं प्रश्नचतुष्टयम्) 1×4= 4**

**i.दिष्ट्या** वर्धेथां युवां ।
(क) दृष्ट्या
(ख) सौभाग्येन
(ग ) दिशा

ii. हरिश्चन्द्रः स्वपुत्रं **जनसङ्कुले** आपणे विक्रीतवान् ।
(क) जनरहिते
(ख) जनसङ्ग्रहे
(ग) जनसम्मर्दयुते

iii. लतेयं **सहकारम्** अवलम्बते ।
(क) साथिनम्
(ख) आम्रम्
(ग) सहपाठिनम्

iv. मुञ्जः **कापालिकं** प्रणम्य प्रावोचद् ।
(क) कपालम्
(ख) वटुकम्
(ग) तान्त्रिकम्

v. एकेन समम् अपि **वसुमती** न गता ।
(क) लक्ष्मी:
(ख) पृथ्वी
(ग) श्रीमती

# संस्कृतसाहित्येतिहासपरिचयः

**7. समुचितस्य रचनायाः कवेः वा अभिधान चिनुत - (केवलं प्रश्नत्रयम्). 1×3= 3**

i. **दौवारिकस्य निष्ठा** अस्य पाठस्य रचयिता कः?

(क) अश्वघोष : (ख) अम्बिकादत्त-व्यास: (ग) कालिदास:

ii. “**राजशेखर**” अस्य लेखकस्य रचना का ?

(क) काव्यमीमांसा (ख) तर्कसंग्रह: (ग) अर्थसंग्रह:

Iii. **कालिदासस्य** काल: क: ?

(क) 500 ई० पू० (ख) 100 ई० पू० (ग) 200 ई० पू०

Iv. **महाभारतम्** अस्या रचनायाः लेखकः क: ?

(क)महर्षि: व्यास: (ख) महर्षि: वाल्मीकि: (ग) अश्वघोष:

**8. गद्य-पद्य-नाटकस्य च विधानां समुचितं वैशिष्ट्यं चिनुत- (केवलं प्रश्नत्रयम्) 1×3=3**

i. नाटकस्य अन्ते नटेन यः **आशीर्वाद**: सामाजिकेभ्यः दीयते तत्......कथ्यते ।

(क) भरतवाक्यम् (ख) नान्दी ग (आकाशभाषितम्)

ii. नाटके **मञ्चसञ्चालनं** करोति........

(क) विदूषकः (ख) सूत्रधार: (ग) नायक:

**iii. पद्यकाव्यं** ............. भवति।

(क) छन्दरहितम् (ख) छन्दोमयम् (ग) मिश्रितम्

**iv. गद्यकाव्यस्य** .................भेदौ स्तः।

(क) द्वौ (ख) चत्वारः (ग) पञ्च

**9. गद्य-पद्य-चम्पूकाव्यस्य च विधानां समुचितं वैशिष्ट्यं चिनुत- (केवलं प्रश्नचतुष्टयम्) 1×4=4**

**i. चम्पूकाव्यं** ..........भवति।

(क) पद्यमयम् ख गद्यमयम् ग गद्यपद्यमयम्

**ii. महाकाव्यं खण्डकाव्यं च** भेदौ स्तः....

(क) पद्यकाव्यस्य (ख) गद्यकाव्यस्य (ग) चम्पूकाव्यस्य

**iii. रामायणम्**....................अस्ति।

(क) खण्डकाव्यं (ख) महाकाव्यं (ग) नाटकम्

**iv. कादम्बरी**......................रचना अस्ति

(क) कालिदासस्य (ख) भासस्य (ग) बाणभट्स्

v. .................... कवीनां **निकषं** वदन्ति

(क) पद्यम् (ख) गद्यम् (ग) मुक्तकम्

## आ – भागः

## वर्णनात्मकाः प्रश्नाः अङ्काः - 40

**10. अपठितगद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत –**

**प्रकृत्या अस्मभ्यं शुद्धं पवित्रं च पर्यावरणं प्रदत्तम्। परं मानवैः स्वकुकृत्यैः इदं प्रदूषितं कृतम् । प्रदूषणसमस्यायाः विषये अद्य सम्पूर्णविश्वं चिन्ताकुलम् अस्ति। प्रदूषणनिवारणस्य उपायेषु 'वृक्षारोपणम्' सर्वोत्कृष्टं मतम्। प्रदूषणसमस्या तदैव उपस्थिता यदा मानवेन स्वार्थसिद्धये वनकर्तनम् आरब्धम् । वृक्षाः मानवजीवनस्य प्राणभूताः । तेषामभावे च विषाक्तवायुः, अतिवृष्टिः, अनावृष्टिः भूक्षरणम् च भवति। प्रकृतौ सन्तुलनस्थापनार्थं वृक्षरक्षणम्**

**वृक्षारोपणम् च आवश्यकम्। विषाक्तवायोः शोषणस्य सामर्थ्यम् वृक्षेषु एवास्ति , येन वातावरणं शुद्धं भवति। नष्टप्रायाणां पशुपक्षिणाम् जातीनाम् च रक्षा अपि अनेनैव संभवा। अतः वृक्षारोपणम् अधिकाधिकं कर्तव्यम्। यतो हि - वृक्षो रक्षति रक्षितः।**

**( अ ) एकपदेन उत्तरत। ( केवलं प्रश्नचतुष्टयम् )** **1/2 x 4 =2**

( i ) **रक्षितः कः रक्षति**?

( ii ) **वृक्षाः कस्य प्राणभूताः**?

( iii) **वातावरणं कैः प्रदूषितम्**?

**(iv) विषाक्तवायोः शोषणसामर्थ्यं केषु अस्ति ?**

**(v) प्रकृत्या केभ्यः शुद्धं पर्यावरणं प्रदत्तम् ?**

**( ब ) पूर्णवाक्येन उत्तरत। ( केवलं प्रश्नद्वयम् )** 2 x 2 = 4

( i ) **प्रदूषणसमस्या कदा उपस्थिता अभवत**

( ii ) **वृक्षाणाम् अभावे किम् भविष्यति**?

( iii ) **मानवजीवनस्य प्राणभूताः के**?

**( स )अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** **1**

**( द ) यथानिर्देशम् उत्तरत । ( केवलं प्रश्नत्रयम् )** **1 x 3 = 3**

( i ) “**इदं प्रदूषितं कृतम्**” **अत्र ‘इदम्’ सर्वनामपदं कस्मै प्रयुक्तम्**?

( ii ) **’सम्पूर्णः’ इति विशेषणपदस्य किं विशेष्यपदम् अत्र प्रयुक्तम् ?**

( iii ) **’प्रदत्तम्’ इति क्रियापदस्य किं कर्तृपदमत्र ?**

( iv **'समीरः'** इति पदस्य समानार्थकं पदं गद्यांशात् चित्वा **लिखत ।**

## रचनात्मकं कार्यम्

**11. प्रतियोगितायां प्रथमे स्थाने आगताय स्वमित्राय लिखिते वर्धापन-पत्रे मञ्जूषातः उचित-पदानि चित्वा रिक्तस्थानानि पूरयत-** ½*10=

(i)……………

तिथि: 10-01-2018

प्रियवर्याः (ii)……………

जयतु (iii)...............

आशा अस्ति भवन्तः सानन्दाः (iv)…………सन्ति। हर्षस्य **(v)……..अस्माकं** सर्वेषां कृते यत् भवान् 'दिल्ली संस्कृत-अकादमी' भाषण-प्रतियोगितासु (vi)………… स्थानम् अलभत। अस्माकं परिवारः भवतां सेवायां सप्रेम (vii)……… प्रेषयति, कामयते च भवतः (viii)………… समुन्नतिम्। (ix)…………
भवदीयः स्नेहाधीनः
(X)………………

## मञ्जूषा

**( उत्तरोत्तरम्, सकुशलाः, खन्नातः, प्रथमम्, सघन्यवादाः, राधेश्यामः, वर्धापनम्, संस्कृतम्, विषयोऽयम्, मोहनदास-महोदयाः )**

**12. मञ्जूषायाम् प्रदत्तपदानाम् सहायतया कथायाः पूर्तिम् कुरुत..** **½*10=5**

## मञ्जूषा

**( आनन्दम्, नयनयोः, पशुम्, बद्धवान्, त्यक्त्वा, पुत्रस्नेहव्याकुला, कुत्रचित्, एकदा, सर्वं दिनम्, आगच्छति स्म )**

(I). कश्चित् नरः आखेटाय अगच्छत्। सः (ii)................ वने अभ्रमत्। किन्तु कम् अपि (iii)............... न अपश्यत्। सायंकाले यदा स्वगृहम् प्रति (iv)................ तदा सः एकाम् पुत्रसहिताम् हरिणीम् अपश्यत्। सः नरः अश्वेन तस्याः अनुसरणम् अकरोत् किन्तु सा मृगी (v) .....................अदृश्या अभवत्। ततः सः तस्याः शावकं गृहीत्वा अश्वस्य पृष्ठे (vi). ...............। अश्वम् आरुह्य सः नरः किञ्चिद् दूरं गत्वा अपश्यत् यत् (vii)................. सा मृगी अपि पुत्रम् अनुसरति स्म। सः अचिन्तयत्-एषा हरिणी स्वप्राणमोहं (viii)................. पुत्रं रक्षितुम् इच्छति। अहो! एतां निराशां न करिष्यामि इति विचार्य सः मृगीशावकम् अमुञ्चत्। हरिणी प्रसन्ना अभवत्। तस्याः (ix).............कृतज्ञताभावः आसीत्।एतद् विलोक्य सः परमम् (x)................ प्राप्तवान्।

## अथवा

**अधोलिखितसंवादे रिक्तस्थानानि पूरयन्तु ।** **1*5=5**

रमा - भवान् कुत्र वसति ?

महेशः - I. ...............................................।

रमा - दिल्लीनगरे भवान् कदा आगच्छत् ?

महेशः - (ii)...............................................

रमा - जोधपुरं त्यक्त्वा भवान् किमर्थम्

आगतवान् ।

महेशः - (iii) .........................................................।

रमा - दिल्लीनगरे भवान् कुत्र स्थास्यति ?

महेशः (iv) .........................................................।

रमा - भवतु, दिल्ली तव कृते

कल्याणकारिणी भवतु ।

महेशः- (v)..........................................................।

**13. प्रदत्तपदानाम् सहायतया 'वृक्षाणां महत्त्वम्' इतिविषयम् अधिकृत्य एकम् अनुच्छेदं लिखत ।**

## मञ्जूषा

( वृक्षाः, पर्यावरणस्य, आधाराः, ऑक्सीजनवायुम्, अतिवृष्टिः, अनावृष्टिः, हरीतिमा, पुष्पाणाम्, सौन्दर्यम्, खगानाम्, आश्रयः )

## अथवा

**निम्नलिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत.**

1. अरविन्द पत्र लिखता है।
   Arvind writes letter.
2. वह कक्षा में प्रथम स्थान प्राप्त करेगा।
   He will be securing first position in the class.
3. गाँव के दोनों ओर वृक्ष हैं।
   There are trees on both the sides of the village.
4. मेरे घर संगीत का कार्यक्रम हुआ था।
   There was a music program at my place.
5. गंगा हिमालय से प्रकट होती है।
   Ganga originates from Himalayas.
6. कवियों में कालिदास श्रेष्ठ है।
   Kalidas is best of all the poets.

## पठितावबोधनम्

**14. अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत।**

वत्सराजस्य इदं वचनमाकर्ण्य कुपितो राजा प्राह-त्वं मम सेवकोऽसि, मया यत्कथ्यते त्वया तद् विधेयम्। पुनः वत्सराजः राजाज्ञा पालनीयैवेति मत्वा तूष्णीं बभूव। अनन्तरम् अनिच्छन्नपि वत्सराज: भोजं रथे निवेश्य रात्रौ वनं नीतवान्। तत्र आत्मनो वधयोजनां ज्ञात्वा भोज: किमपि वत्सराजं कथितवान्। तद्वचनैः वैराग्यमापन्नो वत्सराजः तं न हतवान्, अपितु गृहमागत्य भोजं गृहाभ्यन्तरे भूमौ निक्षिप्य रक्ष। पुनः कृत्रिमरूपेण भोजस्य मस्तकं कारयित्वा राजभवनं गत्वा वत्सराजो राजानं प्राह-श्रीमता यदादिष्टं तत्साधितमिति। ततो राजा भोजवधं ज्ञात्वा तं पृष्टवान्- वत्सराज! खड्गप्रहारसमये तेन किमुक्तम् ?

**(क) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम् )** **½*2=1**

(i) क: तूष्णीं बभूव?

ii. अनिच्छन् अपि वत्सराजः भोजं कुत्र नीतवान् ?

(iii. वत्सराजः कस्य मस्तकं कारितवान् ?

**(ख) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नमेकम् )** **2*1=2**

(i) राजा भोजवधं ज्ञात्वा किं पृष्टवान् ?

ii. कुपितो राजा किं प्राह ?

**15. अधोलिखितं पद्यं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत।**

**गुणी गुणं वेत्ति न वेत्ति निर्गुणः**
**बली बलं वेत्ति न वेत्ति निर्बलः।**
**पिको वसन्तस्य गुणं न वायसः**
**करी च सिंहस्य बलं न मूषकः ।।**

**1.एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** **½*2=1**

i. कः गुणं वेत्ति ?

ii. सिंहस्य बलं कः न जानाति ?

iii. वायसः कस्य गुणं न जानाति ?

2.**पूर्णवाक्येन उत्तरत – (केवलं प्रश्नमेकम् )** **2*1=2**

i. बलस्य महत्वं कः जानाति कः च न ?

ii. निर्गुणः जनः कस्य महत्त्वं न जानाति ?

**16. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत।**

**मदालसा - ब्रह्मवादिनी भविष्यामि। आचार्येतिपदं प्राप्य शिष्येभ्यः जीवनकलां शिक्षयिष्यामि।**

**कुण्डला - जाने तेऽभिरुचिम् अध्ययने अध्यापने च। परं यथा लतेयं सहकारमवलम्बते तथैव नारी जीवनयात्रायां कमपि सहचरम् अपेक्षते, यः तस्याः अवलम्बनं स्यात्।**

**मदालसा - नास्ति मत्कृते आवश्यकता अवलम्बनस्य। स्वयं समर्था जीवनपथे चलितुमहं न कस्यापि सङ्केतैः नर्तितुं पारयामि।**

**कुण्डला –नर्तिष्यसि तदा एकाकिनी एव।**

**(1) एकपदेन उत्तरत (केवलं प्रश्नद्वयम् )** **½*2=1**

(1) ब्रह्मवादिनी का भविष्यति ?
(2) लता कम् अवलम्बते ।
(3) मदालसा पुत्र चलितु

**(2) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नमेकम् )** **2*1=2**

(1) मदालसा जीवने किं कर्तुम् इच्छति ?
(2) नारी कुत्र सहचरम् अपेक्षते ?

**17. अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत –** **½*4=2**

**एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना।**
**आह्लादितं कुलं सर्वं यथा चंद्रेण शर्वरी।।**

**भावार्थ** - एकेन अपि i. _______विद्यासहितेन ii. _______ सम्पूर्ण: वंश: iii. _______ भवति।

येन प्रकारेण रात्रि: iv. ______ स सुशोभते।

**मञ्जूषा**

( चन्द्रमसा, आनन्दित:, सुतेन, सज्जनेन )

**अथवा**

**प्रदत्तभावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत।** **1*2=2**

(1) इदमस्तीदमपि मे भविष्यति पुनर्धनम्।

i. मम पार्श्वे एतन्मात्रं धनमस्ति अत्यधिकमपि अहं प्राप्स्यामि।

ii. इदं वस्तु मम वर्तते अन्यमपि मम एव स्यात्।

iii. इदमस्ति इति चिन्तयित्वा कोऽपि सन्तुष्ट: न।

(2) आढ्योभिजनवानस्मि कोऽन्यो सदृशो मया।

i. अहमेव परिवारसमृद्ध: नास्मि अन्येऽपि सन्ति।

ii. अभिमानिता मम पार्श्वेऽस्ति न कस्यापि।

iii. अहम् कुटुम्बयुक्त: धनवान् मत्सदृश: अपर: क:।

**18 अधोलिखित-अन्वये रिक्तस्थानानि पूरयत -** **½*4=2**

**अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।**

**सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव स:।**

अन्वय: - शास्त्रम् i. ______ परोक्षार्थस्य_ii. _____ (शास्त्रम्) सर्वस्य_iii. ______

यस्य न अस्ति स: iv. ______ एव ।

**मञ्जूषा**

( अन्ध:, दर्शकम्, लोचनम्, अनेकसंशयोच्छेदि )

**अथवा**

प्रश्नपत्रात् भिन्नं पाठ्यपुस्तकस्य श्लोकमेकं लिखित्वा तस्य भावार्थं लिखत—

19) 'क' स्तम्भस्य वाक्यांशानां 'ख' स्तम्भस्य वाक्यांशैः सह मेलनं कुरुत- ½*4=2

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| i. भरतो वा भवेत् राजा | i. त्रिषु पातकेषु |
| ii. इदानीमपि सन्देहः | ii. भरतं हनानि |
| iii. दोषेषु बाह्यमनुजं | iii. किं क्षमा निर्मनस्विता |
| iv. किं रोषणाय रुचिरं | iv. वयं वा ननु तत् समम् |

---